# वसन्तगीतिः

**डॉ. शैलेश कुमार तिवारी**
उत्तराखण्ड संस्कृत विश्वविद्यालय, हरिद्वार

लसति ललितऋतुराजवसन्तः।
मधुमयरसरयभरितभसन्तः,
यत्र विभान्ति समे विलसन्तः।।

अतिमीरो रसमीरसमीरः,
कोकिलकाकलिकलितशरीरः।
मन्दं मन्दं वाति सनीरो
राजन्ते रसिका विहसन्तः।।1।। लसति ...

सलिलं भविलकमलकुलकलिलं
शिथिलं मोहितखगपशुपथिलम् ।
गुहिलशिलानिलललितमचिकिलं
मुग्धा यत्र समे निवसन्तः।।2।। लसति ....

विधृतसुधा वसुधा बहु भासते,
मुदितहृदयजनतेह विराजते ।
सरसवसन्तमवाप्य चकासति
सुमकिसलयनिचया विकसन्तः।।3।। लसति ....

### होलागीतिः (1)

भवेदानन्दसन्दोहादिवृष्टी रम्यहोलायाम्।
सदा स्यान्नव्यभव्योदात्तदृष्टी रम्यहोलायाम् ।।

मदेर्ष्याद्विषलोभक्रौर्यकौटिल्यादिकक्षाणाम्
मिलित्वा होलिका दाह्या मुदास्यां रम्यहोलायाम् ।।1।।

हृदा विस्तार्यतां मैत्री , सुदूरे हीयतां वैरम्।
वहेत् प्रेमप्रसूर्गगा नवीना रम्यहोलायाम् ।।2।।

लभन्तां सज्जनाः स्वेष्टं समस्तं सर्वदा देशे
रमन्तामैक्यधारायां प्रसन्ना रम्यहोलायाम् ।।3।।....

### होलागीतिः (2)

वर्षति रसधारा धरायां होलायाम् ।
वितरितसुखसारा धरायां होलायाम्।।

नवलोल्लसविहाससमृद्धा
राजन्ते बालकयुववृद्धा
अधिगतसुखपारा धरायां होलायाम् ।।1।।

रम्या मेलाकेलावेला
एषा यत्र च होलाहेला
हृतमानसभारा धरायां होलायाम् ।।2।।

नानारागसुरञ्जितदेहा
भान्ति जना भूत्वेह विदेहाः
कृतमदपरिहारा धरायां होलायाम् ।।3।।

## होलागीतिः (3)

मम मोदयते हृदयं होला
मम मोदयते हृदयं होला ।।

अद्य मिथो मतभिन्नजनानपि
मेलयते मृदुला होला ।।1।।
हो हो मेलयते मृदुला होला, मम मोदयते...

चारुतरं नवरससञ्चारं
भूमितले कुरुते होला ।।2।।
हो हो भूमितले कुरुते होला, मम मोदयते...

नानाविघ्नविखिन्ननराणां
खेदततिं हरते होला ।।3।।
हो हो खेदततिं हरते होला, मम मोदयते...

शुष्कहृदयसमरूक्षजनेष्वपि
प्रेमरसं भरते होला ।।4।।
हो हो प्रेमरसं भरते होला, मम मोदयते...

अप्रतिमां नवलां प्रकृताविह
चेतनतां तनुते होला ।।5।।
हो हो चेतनतां तनुते होला, मम मोदयते...

## होलागीतिः (4)

खेलति बालाप्तहोला विलोला
खेलति बालाप्तहोला ।।
रासकुसुममकरन्दमिलिन्दा
मोहितमोहितमदनगोविन्दा
कर्षितकृष्णकपोला ।।1।। विलोला खेलति बालाप्तहोला

हरिचन्दनचन्दितमुखचन्दा
चारुचकोरीकृतयदुनन्दा
आनन्दितभूगोला ।।2।। विलोला खेलति बालाप्तहोला

स्वसदयहृदयपटलपरिपालित-
विविधरागरयकेलोच्छालित-
सुखसागरकल्लोला ।।3।। विलोला खेलति बालाप्तहोला

मन्दसुगन्धितलुनकृततलिने
वन्द्यकलिन्दजयमुनापुलिने
विहरन्ती चटुलोला।।4।। विलोला खेलति बालाप्तहोला

निजकृपया कवलिततापत्रय-
शापपापपीडादिसमुच्चय-
रूपकटोलपटोला ।।5।। विलोला खेलति बालाप्तहोला

समसुरनरमुनिमण्डलमहिता
श्रीराधामोहनयुतिविहिता
खेला सततमतोला ।।6।। विलोला खेलति बालाप्तहोला

बाला +आप्तहोला अर्थात् प्राप्तहोला विलोला ( चञ्चला सती ) बाला ( श्रीराधा ) खेलति।